द्वें हतेऽन्त्येन युते तदन्त्यं त्यजेन्मुहुः स्यादिति राशियुग्मम्। अद्धोविभाज्येन दृढेन तष्टः फलं गुणः स्यादपरो हरेण। एवं तदैवात्र यदा समस्ताः स्युर्लब्धयश्चेद्विषमास्तदानीम्। यदागतौ लब्धिगुणौ विशोध्यौ स्वतक्षणाच्छेषमितौ तु तौ स्तः। भवति कुट्टविधेर्युतिभाज्ययोस्समपवर्त्तितयोरथ वा गुणः। भवति यो युतिभाजकयोः पुनः स च भवेदपवर्त्तनसङ्गुणः। गुणलब्ध्योस्समं ग्राह्यं धीमता तक्षणे फलम्। हरतष्टे धनक्षेपे गुणलब्धी तु पूर्ववत्। योगजे तक्षणाच्छुद्धे गुणाप्ती स्तोवियोगजे। धनभाज्योद्भवे तद्वद्भवेतामृणभाज्यजे। क्षेपतक्षणलाभाढ्या लब्धिः शुद्धौ तु वर्ज्जिता। अथ वा भागहारेण तष्टयोः क्षेपभाज्ययोः। गुणः प्राग्वत्ततोलब्धिर्भाज्याद्धतयुतोद्धृतात्। क्षेपाभावोऽथ वा यत्र क्षेपः शुध्येद्धरोद्धृतः। ज्ञेयः शून्यं गुणस्तत्र क्षेपोहारहृतः फलम्। इष्टाहतस्वस्वहरेण युक्ते ते वा भवेतां बहुधा गुणाप्ती। उदाहरणम्। एकविंशतियुतं शतद्वयं यद्गुणं गणक! पञ्चषष्टियुक्। पञ्चवर्ज्जितशतद्वयोद्धृतं शुद्धिमेति गुणकं वदाशु तम्। न्यासः भा२२१ हा १९५ क्षेपः ६५ अत्र परस्परं भाजितयोर्भाज्यभाजकयोःशेषम् १३ अनेन भाज्यहारक्षेपाअपवर्त्तिताजाता दृढाः भा१७हा१५ क्षेपः ५ अनयोर्दृढभाज्यहारयोः परस्परं भक्तयोर्लब्धमधोधस्तदधः क्षेपस्तदधः शून्यं निवेश्यमिति न्यस्ते जाता वल्ली १। ७। ५। ० उपान्तिमेन स्वोर्द्ध्वे हतइत्यादिकरणेन जातं राशिद्वयम्। ४०। ३५ एतौ दृढभाज्यहाराभ्यामाभ्यां १७। १५ तष्टौ शेषमितौ लब्धिगुणौ अनयोःस्वतक्षणमिष्टगुणं क्षेपइति। अथ वा लब्धिगुणौ २२। २० वा४०। ३५ इत्यादीनि उदाहरणम्। शतं हतं येन युतं नवत्या विवर्ज्जितं वा विहृतं त्रिषष्ट्या। निरग्रकं स्याद्वद मे गुणं तं स्पष्टं पटीयान्यदि कुट्टकेऽसि। न्यासः भा १००हा ६३क्षेपः ९० अत्र बल्ली १। १। १। २। २। १। ९। ० उपान्तिमेनेत्यादिना जातं राशिद्वयं २४३०। १५३० पूर्ववल्लब्धिगुणौ ३०। १८ अथ वा भाज्यक्षेपौ दशभिरपवर्त्तितौ भा१० हा६३ क्षेपः ९ एभ्योऽपि पूर्ववद्वल्ली ०। ६। २ ९। ० उपान्तिमेनेत्यादिना राशिद्वयम् २७। १७१ पूर्ववज्जातौ लब्धिगुणौ ७। ४५। अत्र लब्धयोविषमा इति स्वतक्षणाभ्यामाभ्यां १०। ६३ शोधितौ जातौ बब्धिगुणौ ३। १८ अत्र लब्धिर्न ग्राह्या गुणघ्नभाज्ये क्षेपयुते हर भक्ते लब्धिश्च ३०। अथ वा भाज्यक्षेपापवर्त्तनेन १० पूर्व्वानीता लब्धि ३र्गुणिता जाता सैव लब्धिः३०। अथ वा हारक्षेपौ नवभिरपवर्तितौ भा१०० हा७ क्षे३० पूर्व्ववद्वल्ली १४। ३। १०। ० जातं राशिद्वयम् ४३०। ३० तक्षणे जातं ३०। २ हारक्षेपापवर्त्तनेन ९ गुणं सङ्गुण्य जातौ लब्धि गुणौ तावेव ३०। १८। अथ वा भाज्यक्षेपौ हारक्षेपौ चापवर्त्त्य न्यासः भा१० हा७ क्षे १ अत्र जाता वल्ली १। २। १। ० पूर्व्ववज्जातं राशिद्वयम् ३, २ तक्षणाज्जातं तदेव ३। २ भाज्यक्षेपहारक्षेपापवर्त्तनेन क्रमेण लब्धिगुणौ गुणितौ जातौ तावेव३०। १८ गुणलब्ध्योः स्वहारौ क्षेपाविति अथ वा लब्धिगुणौ १२० १८ वा २३०१४४ इत्यादि। योगजे गुणाप्ती १८। ३० स्वतक्षणाभ्यामाभ्यां ६३। १०० शुद्धे जाते नवतिशुद्धौ गुणाप्ती ४५। ७० वा १०८। १७० वा। १७१। २७०। इत्यादि। उदाहरणम्। यद्गुणा क्षयगषष्टिरन्विता वर्जिता च यदि वा त्रिभिस्ततः। स्यात्त्रयोदशहृता निरग्रका तं गुणं गणक! मे पृथग्वद। न्यासः भा ६० हा१३ क्षे ३। प्राग्वज्जाते धनभाज्ये धनक्षेपे गुणाप्ती११। ५१ एते स्वस्वतक्षणाभ्यामाभ्यां १३। ६० शुद्धे जाते ऋणभाज्ये धनक्षेपे २। ९। अत्र भाज्यभाजकयोर्विजातीययो र्भागहारेऽपि चैवं निरुक्तमित्युक्तत्वाल्लब्धेः ऋणत्वं ज्ञेयम् २ ९ पुनरेते स्वतक्षणाभ्यामाभ्यां १३। ६० शुद्धे जाते ऋणभाज्ये ऋणक्षेपे गुणाप्ती ११। ५१। ऋणभाज्ये ऋणक्षेपे धनभाज्यविधिर्भवेत्। तद्वत्क्षेपे ऋणगते व्यस्तं स्यादृणभाज्यके। धनभाज्योद्भवे तद्वद्भवेतामृणभाज्यजे। मन्दावबोधार्थं मयोक्तम्। अन्यथा योगजे तक्षणाच्छुद्धे इत्यादिनैव सिद्धं यतः ऋणधनयोगो वियोगएव। अतएव भाज्यभाजकक्षेपाणां धनत्वमेव प्रकल्प्य गुणाप्ती साध्ये। ये योगजे भवतः ते स्वतक्षणाभ्यां शुद्धे वियोगजे कार्य्ये। भाज्ये भाजके वा ऋणगते परस्परभजनाल्लब्धयः ऋणगताः स्याप्यादिति किं तेन प्रयासेन तथाकृते सति भाज्यभाजकयोरेकस्मिन् ऋणगते गुणाप्ती द्वौ राशी क्षिपेत्तत्रेत्यादिना परोक्तसूत्रेण लब्धौ व्यभिचारः स्यात्। उदाहरणम्। अष्टादश हताः केन दशाढ्या वा दशोनिताः। शुद्धं भागं प्रयच्छन्ति क्षयगैका दशोद्धृताः। न्यासः भा१८हा११क्षे १० अत्र भाजकस्य धनत्वं प्रकल्प्य साधितौ लब्धिगुणौ १४। ८ एतावेव ऋणभाजके। किं तु लब्धेः पूर्व्व